# बाल भारती पब्लिक स्कूल पीतमपुरा
दिल्ली – 110034

## साप्ताहिक योजना

सप्ताह -**9 -12** नवंबर

कालांश **- 2**

विषय - संस्कृत

उपविषय - पाठ -सूक्तयः

शिक्षण अधिगम - छात्र पाठ पर आधारित प्रश्नों के उत्तर दे सकेंगे।

सहायक सामग्री - अभ्यास पत्रिका

BBPS, PITAMPURA

## पाठ-9 सूक्तयः

प्रश्न-1 उचित-पर्यायवाचिपदं रेखांकित कुरुत

1 तेपे - तपः, तपस्या कृता
2 तथ्यतः - वास्तविकता, यथार्थरूपेण
3 विमूढधीः - बुद्धिः, मूर्खबुद्धिः
4 वदने - मुखे, वदति
5 तत्कार्यनिर्णयः - आत्मज्ञानम्, सत्यासत्यनिर्णयः
6 श्रेयः - श्रेष्ठः, कल्याणम्
7 परुषाम् - कठोराम्, पुरुषम्
8 अकातरः - मूर्खः, निर्भीकः
9 ईरितः - वक्रता, कथितः
10 चित्ते - वाणी, मनसि
11 अभ्युदीरयेत् - खादेत्, वदेत्
12 अवक्रता - सरलता, समानता
13 भुङ्क्ते - खादति, दीयते
14 मन्त्री - तान्त्रिकः, परामर्शदाता
15 वाक्पटुः - सम्भाषणे कुशलः, पटुता
16 चक्षुः - नेत्रम्, नेत्रे
17 परैः - अन्यैः, शत्रुभिः
18 प्रभूतम् - विपुलम्, ईश्वरम्
19 वाचम् - वाणीम्, वाक्यम्
20 ~~शिवम् - शुभम्, सुन्दरम्~~
21 बाल्ये - बालके, बाल्यावस्थायाम्
22 धर्मप्रदम् - धार्मिकम्, धर्मयुक्ताम्
23 वाचि - वाण्याम्, वदने
24 विदुषाम् - पण्डितम्, पण्डितानाम्

प्रश्न2 रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत।-

i) पिता पुत्राय महत् विद्याधनं यच्छति।
ii) महात्मानः तदेव समत्वम् वदन्ति।
iii) विमूढधीः परुषां वाचं वदति।
iv) अस्मिन् लोके विद्वांसः एव चक्षुष्मन्तः प्रकीर्तिताः।
v) धैर्यवान् मन्त्री परैर्न परिभूयते।
vi) मनुष्यः आत्मनः श्रेयः इच्छति।
vii) आचारः प्रथमो धर्मः एतद् विदुषां वचः।
viii) मनुष्यः कदापि परेभ्यः अहितं कर्म न कुर्यात्।
ix) पिता पुत्राय बाल्ये विद्याधनं यच्छति।
x) चित्ते वाचि च समत्वम् भवेत्।

प्रश्न3 पाठस्य सन्धियुक्त-पदानां सन्धिच्छेदं क्रियताम्।-

1) पिताऽस्य -
2) तपस्तेपे -
3) इत्युक्तिस्तत् -
4) भवेद् यदि -
5) तदेवाहुः -
6) योऽभ्युदीरयेत् - यः +
7) भुङ्क्तेऽपक्वम् -
8) विद्वांस एव -
9) लोकेऽस्मिन् -
10) भवेद्येन -
11) इतीरितः -
12) वाक्पटुर्धैर्यवान् -

BBPS, PITAMPURA

3

13) अप्रकातर: ________ 17) इत्येतद् ________

14) परैर्न ________ 18) प्राणेभ्योऽपि ________

15) इच्छत्यात्मन: ________ 19) तस्माद् रक्षेत् ________

16) कुर्याद्धितम् ________

प्रश्न 4 प्रदत्तपदानि तेषां विलोमपदैः सह मेलयत ! -

| | पदानि | विलोमपदानि | उत्तराणि |
|---|---|---|---|
| 1) | धर्मप्रदाम् | अन्धा: | 1) |
| 2) | पक्वम् | परुषाम् | 2) |
| 3) | चक्षुष्मन्त: | अपक्वम् | 3) |
| 4) | कृतज्ञता | सुधी: | 4) |
| 5) | वक्रता | कृतघ्नता | 5) |
| 6) | विद्वांस: | अवक्रता | 6) |
| 7) | विमूढधी: | मूर्खा: | 7) |
| 8) | श्रेय: | कातर: | 8) |
| 9) | अकातर: | प्रेय: | 9) |
| 10) | आत्मन: | हितम् | 10) |
| 11) | अहितम् | परस्य | 11) |
| 12) | सदाचारम् | दुराचारम् | *उदाहरण→ सदाचारम् – दुराचारम् |

प्रश्न 5 श्लोकान् पठित्वा प्रश्नान् उत्तरत ! -

1. पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥

I एकपदेन उत्तरत ! -

i) विद्याधनं क: यच्छति? ________

ii) विद्याधनं कदा दीयते? ________

II पूर्णवाक्येन उत्तरत ! -

अत्र धनं किम् अमन्यत? ________

III भाषिक-कार्यम् ! -

1) 'तत्' सर्वनाम कस्मै प्रयुक्तम्? क) पित्रे ख) पुत्राय ग) विद्याधनाय

2) 'कृतघ्नता' पदस्य विलोमपदं चित्वा लिखत क) समत्वम् ख) अवक्रता ग) कृतज्ञता

BBPS, PITAMPURA

iii) 'यच्छति' इति क्रियापदस्य कर्तृपदं किम्? - क) विद्याधनम् ख) पिता ग) पुत्राय

iv) 'विद्याधनम्' इत्यस्य विशेषणपदं किम्? क) बाल्ये ख) पिता ग) महत्

2) अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।
तदेवाहुः महात्मानः समत्वमिति तथ्यतः ॥2॥

I एकपदेन उत्तरत :-

i) चित्ते किं भवेत्?

ii) अवक्रता तथा कस्यां यदि भवेत्?

II पूर्णवाक्येन उत्तरत :-

समत्वं किं कथ्यते?

III भाषिक-कार्यम् :-

i) 'भवेत्' इति क्रियापदस्य कर्तृपदं किम्? (क) अवक्रता (ख) समत्वम् (ग) महात्मानः

ii) 'यथा' इति पदस्य विलोमपदं किम्? (क) यदि (ख) तथा (ग) एव

iii) 'वदन्ति' इत्यर्थे अत्र किं पदं प्रयुक्तम्? (क) आहुः (ख) वाचि (ग) तथ्यतः

iv) 'विषमं' पदस्य विलोमपदं किम्? (क) तथ्यतः (ख) अवक्रता (ग) समम्

3) त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥

I एकपदेन उत्तरत :-

i) विमूढधीः कीदृशीं वाचं त्यजति?

ii) कः परुषां वाचं वदति?

II. पूर्णवाक्येन उत्तरत :-

विमूढधीः किं करोति?

III भाषिक-कार्यम् :-

i) 'यः' इति पदस्य क्रियापदं किं प्रयुक्तम्? (क) भ्युदीरयेत् (ख) ऽभ्युदीरयेत् (ग) अभ्युदीरयेत्

ii) 'विमूढधीः' पदस्य क्रियापदं किम्? (क) ऽभुङ्क्ते (ख) भुङ्क्ते (ग) खादति

iii) 'परुषाम्' इति कस्य पदस्य विशेषणम्? (क) वाचम् (ख) पक्वम् (ग) धर्मप्रदाम्

iv) 'मधुराम्' इत्यस्य विपर्ययपदं चिनुत। (क) धर्मप्रदाम् (ख) परुषाम् (ग) पक्वम्

BBPS, PITAMPURA

(4) य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म स परेभ्यः कदापि च॥

I एकपदेन उत्तरत :-

i) जनः आत्मनः किम् इच्छति ?

ii) मनुष्यः कीदृशं कर्म न कुर्यात् ?

II पूर्णवाक्येन उत्तरत :-

कः परेभ्यः अहितम् कर्म न कुर्यात् ?

III भाषिक - कार्यम् :-

i) 'श्रेयः' इत्यस्य विपर्ययपदं किम् ? (क) अहितम् (ख) श्रेयः (ग) आत्मनः

ii) 'इच्छति' इत्यस्य कर्तृपदं किम् ? (क) यः (ख) सः (ग) नरः

iii) 'सः' इति सर्वनाम कस्मै प्रयुक्तम् ? (क) सुखाय (ख) जनाय (ग) कर्मणे

iv) 'कर्म' इत्यस्य विशेषणपदं किम् ? (क) हितम् (ख) दहितम् (ग) अहितम्

प्रश्न6 प्रदत्तश्लोकानाम् अन्वयं मञ्जूषायाः सहायतया पूरयत :-

* मञ्जूषा - अपि, प्रथमः, परिभूयते, एतत्, रक्षेत्, चक्षुष्मन्तः, वाक्पटुः, अस्मिन्, परैः, वदने, चक्षुनामनी, प्राणेभ्यः ।

(1) वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।
स केनापि प्रकारेण परैर्न परिभूयते॥

⇒ (यः) मन्त्री [1] ______, धैर्यवान्, सभायाम् [2] ______ अकातरः (अस्ति) सः [3] ______ केन अपि प्रकारेण न [4] ______ ।

(2) विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।
अन्येषां वदने ये तु ते चक्षुनामनी मते॥

⇒ [1] ______ लोके विद्वांसः एव [2] ______ प्रकीर्तिताः। अन्येषां [3] ______ ये (चक्षुषी) ते तु [4] ______ मते।

(3) आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥

⇒ आचारः [1] ______ धर्मः इति [2] ______ विदुषां वचः, तस्मात् [3] ______ अपि सदाचारं [4] ______ रक्षेत्।

———X———